**दिनाङ्क :- 20.05.2025**

**सायम् :- 06:20**

**आदौ-मुख्यवार्ता:**

- **विदेश-सचिव: विक्रम-मिस्री अद्य सर्व-दलीय-प्रतिनिधिमण्डलं सम्बोधितवान्। ध्येयं यत् सिन्दूराभियान-विषये कूटनीतिक-दृष्ट्या भारतेन विदेशं प्रति सर्वदलीय-प्रतिनिधय: प्रेष्यन्ते।**
- **प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् भारतस्य स्वास्थ्य-परिष्कारः विकासयुतां संरचनां प्रस्तौति।**
- **केन्द्रीय-कृषि-कृषक-कल्याण-मन्त्री शिवराज-सिंह-चौहानः अवदत् यत् सर्वकारस्य विशिष्टम् अवधानं विज्ञानाधारित-कृषि-परिवर्तनं संवर्धयितुं वर्तते।**
- **सीम-सुरक्षा-बलेन घोषितं यत् पञ्जाब सीमां समेत्य त्रिषु संयुक्त-सन्धि-स्थात्रेषु बीटिंग रीट्रिट इति समारोहः अद्य पुनः आरभते।**
- **आई पी एल् क्रिकेट्-प्रतिस्पर्धा-मालिकायाम् अद्य चेन्नई-सुपर-किंग्स-दलस्य सामुख्यं राजस्थान-रॉयल्स-दलेन सह भविष्यति।**

**अथ वार्ताः विस्तरेण**

**मिस्री शिष्टमण्डललम्**

विदेश-सचिव: विक्रम-मिस्री अद्य सर्व-दलीय-संसदः सदस्येभ्य: सूचनाम् अयच्छत्। ध्येयं यत् सिन्दूराभियान-विषये कूटनीतिक-दृष्ट्या भारतेन विदेशं प्रति सर्वदलीय-प्रतिनिधय: प्रेष्यन्ते। सर्वकारेण ऑपरेशन-सिन्दूर-प्रक्रमे पाकिस्तान-प्रायोजित-आतङ्कवादं विरुध्य भारतस्य नीतिं विचारं च विभिन्न-देशेषु प्रचारयितुं सर्व-दलीय-प्रतिनिधिमण्डलं प्रेषयिष्यते इति घोषणा भारतेन पूर्वमेव कृतास्ति। एतादृशं सप्तप्रतिनिधि-मण्डलं संयुक्तराष्ट्र-सुरक्षा-परिषद: सदस्यसमेतं प्रमुख-सहभागि-देशानां भ्रमणं करिष्यति। अवधेयं यत् एकोनषष्टि-सदस्य-युतं संसदीय-प्रतिनिधि-मण्डलं मईमासस्य त्रयोविंशतिदिनाङ्कात् जूनमासस्य प्रथमदिनाङ्कं यावत् द्वाविंशति-देशानां भ्रमणं करिष्यति। प्रतिनिधिमण्डलम् अमेरिका-ब्रिटेन-फ्रांस-जर्मनी-जापान-सऊदी-अरब-ब्राजील-सहितेषु नैकेषु देशेषु भ्रमणं करिष्यति। मण्डलस्य नेतृत्वकर्तृषु सांसदेषु शशिथरूर:, रविशंकर-प्रसाद:, संजयझा:, बैजयंत-पाण्डा, कनिमोझी करूणानिधि:, सुप्रिया सुले, श्रीकान्त-सिन्दे च सम्मिलिता: सन्ति। प्रतिनिधिमण्डलेन आतङ्कवादं विरुध्य भारतस्य एकीकृतप्रवृति: शून्य-सहनशीलता-भावस्य च नीति: तत्र प्रसारयिष्यते।

## प्रधानमन्त्री विश्व-स्वस्थ्यसङ्घटनम्

प्रधानमन्त्री नरेन्द्रमोदी अष्ट-सप्तति-तमां विश्व-स्वास्थ्य-महासभां प्रावोचत् यत् स्वस्थ-विश्वस्य भविष्यः समावेशे एकीकरणे सहयोगे च आश्रितो वर्तते। जिनेवायाम् आयोजितं सत्रम् दृश्याकङ्न-माध्यमेन सम्बोधयन् तेनोक्तं यत् भारतस्य स्वास्थ्य-परिष्कारः समानताधारिताय विश्वाय सतत् विकासयुतां संरचनां प्रस्तौति। श्रीमोदिना भारतस्य स्वास्थ्य-कल्याण-केन्द्राणां विशाल-तन्त्रम् अशीत्यधिक-पञ्चशत्-सहस्र-जनेभ्यः निशुल्कम् आयुष्मान-भारत-स्वास्थ्यागोप-योजना प्रभृतिविषयाः उल्लेखिताः।

## एस/बी-पी एम मोदी ऑन अयुष्मान स्कीम

प्रधानमन्त्रिणा स्वास्थ्य-अभिज्ञान-पत्र-दूरभाषिकौषध प्रणाली अपि रेखाङ्किते। याभि: चत्वारिंशदुत्तर-त्रिशत-सहस्राधिक-परामर्शा: सम्भवा: अभवन्। प्रधानमन्त्रिणा विश्वस्वास्थ्य-सङ्घटनस्य महामारी सन्धि-प्रगति : प्रशंसिता। वैश्विक सहयोगाय भारतस्य प्रतिबद्धता च पुष्टीकृता।

## विराम:

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

## शिवराज-वी सी-कान्फ्रेंस

केन्द्रीय-कृषि-कृषक-कल्याण-मन्त्री शिवराजसिंहचौहान: अद्य कृषि-विश्वविद्यालयस्य कुलपतीनाम् आचार्याणां छात्राणाञ्च राष्ट्रव्यापि-विकसित-कृषि-संकल्प-अभियाने सम्मेलितुं साग्रहम् आह्वानम् अकरोत्। इदं हि कृषि-संकल्प-अभियानम् अस्य मासस्य एकोनत्रिंशत्-दिनाङ्कात् आरप्स्यते। नवदेहल्यां कृषि-विश्वविद्यालयानां कुलपतीनां भारतीय-कृषि-अनुसन्धान-परिषद्-संस्थानानां निदेशकानां सम्मेलनं सम्बोधयन् श्रीचौहान: अवदत् यत् सर्वकारस्य विशिष्टम् अवधानं विज्ञानाधारित-कृषि-परिवर्तनं संवर्धयितुं वर्तते। भारतीय-कृष्यनुसन्धान-परिषद् कृषे: मन्दिरमिति अपि चौहानेन कथितम्। इयं परिषद् अनुसन्धानस्य दिशि कृषकाणां कृषि-विषयक-आवश्यकतानाञ्च समुचित-प्रकारेण मार्गदर्शनं करोति।

## पर्यटन-उपवेशनम्

प्रधानमन्त्रिणा नरेन्द्र मोदिना अद्य एकस्मिन् उपवेशने पर्यटनक्षेत्रस्य प्रगते: समीक्षाकृता। एतस्मिन् उपवेशने पर्यटनमन्त्री गजेन्द्र शेखावत: पर्यटनराज्यमन्त्री सुरेशगोपी अन्ये च वरिष्ठाधिकारिण: सम्मिलिता: आसन्।

## सीमसुरक्षाबलम्

सीम-सुरक्षा-बलेन घोषितं यत् पञ्जाब सीमां समेत्य त्रिषु संयुक्त-सैन्य-स्थात्रेषु बीटिंग रीट्रिट इति समारोहः अद्य पुनः आरभते। सीम-सुरक्षा-बलानुसारं समारोहे अद्य वार्ता-समवायानां कर्मिभ्यः विशेषरूपेण प्रवेशानुमतिः वर्तते। सामान्य-जनेभ्यः समारोहे श्वः प्रवेशानुमतिः भविष्यति। वधेयम् अस्ति यत् अटारी, हुसैनीवाला सादकी चेति संयुक्त-सैन्य-स्थात्रेषु बीटिंग रीट्रिट इति समारोहः अस्य माससस्य अष्टमे दिने सामान्य-जनेभ्यः निरसितः आसीत्।

**मनोहरलालः**

केन्द्रीय-विद्युत्-मन्त्रिणा मनोहर-लालेन ऊर्जा-सुरक्षा सम्प्रतिकेषु महत्त्वपूर्ण-समाह्वानेषु अन्यत-रूपेण रेखाङ्कितम्। ब्राजील-देशे ब्रिक्स-राष्ट्राणाम् ऊर्जा-मन्त्रिणाम्

उपवेशने भारतीय-प्रतिनिधि-मण्डलस्य नेतृत्वं विद्धता तेन स्वच्छोर्जस: क्षेत्रे भारतस्य उपलब्धय: प्रदर्शिता:। श्रीमनोहर-लालेन ऊर्जसोत्पादनस्य विस्तारे नवीकरणीयोर्जसां अथ हरित-हाइड्रोजन इत्येतेषु संवर्धनाय भारतस्य दशवर्षाणां प्रगति: प्रस्तुता।

इदम् उपवेशनं ऊर्जासंवर्धने सतत् विकासे च समेकित निर्णयेन सह सम्पन्नम्।

**दिल्ली क्रीडा**

दिल्ल्या: मुख्यमन्त्री रेखागुप्ता अद्य तालकटोरा-क्रीडाङ्गणे ऐषम: दिल्ली क्रीडीया: उद्घाटनम् कृतवती। अत्रावसरे तया उक्तं यत् प्रशासनेन क्रीडाभ्य: द्विगुणित: राशि: आवंटित:। येन क्रीडकेभ्य: पुरस्कार-व्यवस्था आधारभूत-संरचनाया: च व्यवस्था भविष्यति।

**महाराष्ट्रे शपथवचनम्**

महाराष्ट्रे अद्य राष्ट्रवादी कांग्रेस पार्टीति दलस्य वरिष्ठ-नेता छगन- भुजबलः मुम्बय्यां महायुति-प्रशासनस्य मन्त्रिरूपेण गोपनीयतायाः शपथं स्वीकृतवान्। राज्यपालेन सी पी राधाकृष्णनेन राजभवने तस्मै पद-गोपनीयतायाः शपथवचनं प्रतिज्ञापितम्। शपथ-ग्रहण-समारोहे मुख्यमन्त्री देवेन्द्र- फडणवीसः उप-मुख्यमन्त्रिणौ एकनाथ-शिन्दे अजित-पवारश्च उपस्थितौ आस्ताम्।

**प्रधानमन्त्रीअमृत-भारतम्**

प्रधानन्त्री नरेन्द्र-मोदी गुरुवासरे राजस्थानस्य बीकानेरस्थिते देशनोक-स्थलाल् त्रयोत्तरैक-शतम् अमृत-भारत-स्थासनानाम् उद्घाटनं करिष्यति। अमृत-भारत-स्थासन-योजनायाः अन्तर्गतम् एतानि स्थासनानि आधुनिक-सौविध्य-युक्तानि विधाय सिटीसेंटर अर्थात् नगरकेन्द्र-रूपेण पुनः विकसितानि। अत्र क्षेत्रीय-संस्कृतिः रिक्थम् च प्रदर्शयिष्यन्ते।

**विदेशमन्त्री नीदरल▯देशे**

विदेशमन्त्री डॉ. एस. जयशङ्करः अद्य हेग-नगरे नीदरलैण्ड-देशस्य प्रधानमन्त्रिणा डिक शूफ इत्यनेन सह मेलनम् अकरोत्। सामाजिक-सञ्चार-पटले डॉ. जयशङ्करेण उक्त यत् मेलनावसरे तेन नीदरलैंड़देशस्य प्रधानमन्त्रिणे प्रधानमन्त्रिणः नरेन्द्र-मोदिनः पक्षतः हार्दिक- शुभकामनाः प्रदत्ताः। अथ च आतङ्कवादं विरुध्य नीदरलैंड्स-राष्ट्रस्य दृढतायै तस्मै धन्यवादः अपि दत्तः। नीदरलैंड्स-देशस्य प्रधानमन्त्रिणा अप्रैल-मासस्य द्वाविंशे दिने पहलगामे दुरापादितस्य आतङ्क्याक्रमणस्य कठोर-निन्दा कृतासीत्।

आतङ्कवादस्य सर्वविधाभिव्यक्तयः निराकृताः। अवधेयं यत् विदेश-मन्त्री नीदरलैंड्स डेनमार्क जर्मनी राष्ट्राणां षडदिवसीय-यात्रारतो वर्तते।

## ऋतुसञ्चेतना

ऋतु-विज्ञान-विभागेन आगामि-दिन-द्वये कर्नाटके तीव्र-वर्षायाः नारङ्ग-वार्णिकी-सञ्चेतना प्रसारिता अस्ति। कर्नाटक-तमिलनाडु-कोंकण-गोवा-महाराष्ट्रस्य च समीपवर्तिक्षेत्रेषु आगामि-दिनत्रयावधौ प्रचण्ण-वृष्टेः रक्त-वार्णिकी-सञ्चेतना अपि वर्षा प्रसारिता। ऋतु-विज्ञान-विभागस्य वरिष्ठ-वैज्ञानिकः आर.के. जेनामणिः अवोचत् यत् मुम्बय्याम् अपि श्वः आरभ्य मध्यम-तीव्र-वर्षाः सम्भावना वर्तते।

## आई.पी.एल्.-क्रिकेट

इण्डियन्-प्रीमीयर-लीग-इत्येतस्यां क्रिकेट्-प्रतिस्पर्धा-मालिकायाम् अद्य राजधान्यां नवदिल्ल्यां अरुणजेटलीक्रीडाङ्गणे चेन्नई-सुपर-किंग्स-दलस्य सामुख्यं राजस्थान-रॉयल्स-दलेन समम् सायंकाले सार्धसप्तवादने भविष्यति। अवधेयं यत् स्पर्धायाः परिणामेण दलद्वयाय कोपि लाभः न भविष्यति यतोहि दलद्वयं शृङ्खलातः बहिर्भूते।

**।। इति वार्ताः ।।**